17. आचार्यः चरकः

[પ્રાચીન ભારતમાં વિવિધ વિદ્યાક્ષેત્રોમાં અનેરું પ્રદાન કરનારા અનેક આચાર્યો થઈ ગયા છે. તેમાંના કેટલાક આચાર્યો તેમણે રચેલા જે-તે વિદ્યાશાખાના ગ્રંથના રૂપમાં આજે પણ આપણી વચ્ચે ઉપસ્થિત છે. આવા આચાર્યોમાંના એક આચાર્ય ચરક છે.

આચાર્ય ચરક આયુર્વેદશાસ્ત્રના મહાન વિદ્વાન હતા. તેમણે ઔષધવિજ્ઞાનનો પાયો નાંખ્યો હતો. બીજા વિદ્વાનોની જેમ તેમના જીવન વિષે પણ કોઈ ખાસ માહિતી મળતી નથી. પરંતુ તેમણે રચેલો ગ્રંથ આજે પણ આપણી પાસે ઉપલબ્ધ છે. સંસ્કૃત ભાષામાં લખાયેલા આ ગ્રંથનું નામ ચરકસંહિતા છે. આયુર્વેદશાસ્ત્રનો અભ્યાસ કરવાની ઇચ્છા રાખનાર પ્રત્યેક વ્યક્તિએ આ ચરકસંહિતા નામનો ગ્રંથ વાંચવો જ પડે છે.

પ્રસ્તુત પાઠમાં આયુર્વેદશાસ્ત્રના આ સુપ્રસિદ્ધ વિદ્વાનનો પરિચય મેળવવાનો છે. એ સાથે તેમનો એક ઉપદેશ પણ ગ્રહણ કરવા જેવો જ છે. રોહવિહીન શરીર એ સૌથી મૂલ્યવાન ધન છે, એટલે પ્રત્યેક વ્યક્તિએ પોતે કેવી રીતે રોગરહિત રહી શકે છે, તે પણ જાણી લેવું જોઈએ. આ મહત્ત્વની જાણકારી આ પાઠના માધ્યમથી મેળવી શકાશે.]

चरकनाम्ना प्रसिद्धः आचार्यः ख्रिस्तस्य प्रथमशताब्द्यां आयुर्वेदस्य महान् पण्डितः । सः कनिष्कनृपतेः राजवैद्यः आसीत् ।

अस्य आचार्यस्य चरकसंहितानामकः सुप्रसिद्धः ग्रन्थः वर्तते । आयुर्वेदस्य प्राचीनतमेषु विश्वविख्यातेषु च ग्रन्थेषु अस्य गणना भवति ।



अस्मिन् ग्रन्थे सूत्रस्थानम्, निदानस्थानम्, विमानस्थानम्, शारीरस्थानम्, इन्द्रियस्थानम्, चिकित्सास्थानम्, कल्पस्थानम्, सिद्धिस्थानम् चेति अष्टौ प्रकरणानि सन्ति । एतेषु सर्वेषु प्रकरणेषु सम्मिल्य विंशत्युत्तर-एकशतम्

(120) अध्याया: सन्ति । अस्य ग्रन्थस्य प्रमाणं द्वादशसहस्रश्लोकात्मकं वर्तते । अत्र प्राय: सहस्रद्वयम् औषधयोगानां विस्तृतम् व्याख्यानमस्ति । अस्मिन् व्याख्याने ज्वर-रक्तपित्त-उन्माद-अतिसार-प्रमेहादीनाम् उदर-शिरो-हृदयादीनां च रोगाणां निवारकानि विनाशकानि च औषधानि उल्लिखितानि सन्ति । एवं हि मन्यते यत् भारते औषधविज्ञानस्य प्रवर्तक: अयमेवाचार्य: ।

निखिलमपि आयुर्वेदसाहित्यम् आचार्यस्य चरकस्य उच्छिष्टमस्ति । अथ च आयुर्वेदशास्त्रीयं यत् ज्ञानं चरकसंहितायां वर्तते तदेव सर्वत्र वर्तते, चरकसंहितायां यत् नास्ति, तत् कुत्रापि न वर्तते ।

अस्य केचन उपदेशा: स्मर्तव्या: सन्ति । तद्यथा - मनुष्य: केन प्रकारेण रोगरहित: भवितुम् अर्हतीति विषये उपदिशति आचार्य: -

नरो हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्त: ।
दाता सम: सत्यपर: क्षमावानाप्तोपसेवी च भवत्यरोगी ।।

अर्थात् य: नर: हितस्य आहारस्य विहारस्य च सेवनं करोति, सर्वं कार्यं समीक्ष्य करोति, विषयेषु नितरामासक्त: न भवति, य: दानं करोति, व्यवहारे समत्वं क्षमाभावं च आचरति, आप्तजनानां सेवां करोति तादृश: नर: अरोगी अर्थात् स्वस्थ: भवति ।

अत्र एक: प्रश्न: । 'किम् औषधं विना सम्यक् व्यवहारेणापि जन: रोगरहित: भवितुमर्हती'ति ? तस्येदमुत्तरम् । यदा रोग: शरीरे प्रविष्टो भवति, तदा औषधस्य आवश्यकता भवति । परन्तु शरीरे रोगस्य प्रवेश: एव न स्यात् एतदर्थं मानवेन सम्यक् व्यवहार: करणीय एव । व्यवहारस्यापि स्वास्थ्ये प्रभावो भवतीत्येष: चरकाचार्यस्य उपदेश: ।

ટિપ્પણી

નામ (પુંલ્લિંગ) : ख्रिस्त: ઈસુ ખ્રિસ્ત **औषधयोग:** દવા, ઔષધ (વિવિધ વસ્તુઓના સંમિશ્રણથી તૈયાર કરાતી ઔષધીને ઔષધયોગ કહે છે.) **ज्वर:** તાવ **रक्तपित्त:** રક્તપિત્ત નામનો રોગ **उन्माद:** એક માનસિક રોગ કે જેમાં માણસને ગાંડપણ આવી જાય છે. **अतिसार:** મરડો, દસ્ત-ઝાડા થવા તે **प्रमेह:** મીઠીપેશાબનો રોગ, ડાયાબિટીસ **प्रवर्तक:** પ્રવર્તન કરનાર, પ્રવૃત્તિનો જનક

(સ્ત્રીલિંગ) : प्रथमशताब्दी પહેલું શતક, પહેલી સદી **उक्ति:** કથન, કહેણ

(નપુંસકલિંગ) : तदानीन्तनम् તે વખતનું **उदरम्** પેટ **निवारकम्** નિવારણ કરનાર, દૂર કરે તેવું

સર્વનામ : अयम् આ (પું.) **अस्य** આનું (પું.) **एतेषु सर्वेषु** આ બધામાં (પું. અને નપું.) **अस्मिन्** આમાં (પું.) **केन** કોનાથી (પું.) **य:** જે (પું.)

વિશેષણ : प्राचीनतम અત્યન્ત પ્રાચીન, ઘણું જૂનું, અતિશય જૂનું **प्रथमा** પહેલી **द्वितीया** બીજી, બીજા ક્રમાંકે રહેલી **निखिल** બધું, સમગ્ર **तादृश** તેના જેવું **प्रविष्ट** પ્રવેશેલું, દાખલ થયેલું

અવ્યય : प्राय: ઘણું કરીને, મોટે ભાગે **इह** અહીં, આ સ્થાને **अन्यत्र** બીજા સ્થાને, બીજી જગાએ **क्वचित्** ક્યાંક, ક્યારેક **कुत्रापि** ક્યાંય પણ **सर्वत्र** બધે, બધી જગાએ **केचन** કેટલાક (પું.) **तद्यथा** જેમકે

કૃદન્તપદ : सम्मिल्य (सम् + मिल् + त्वा > य) अधिकृत्य (अधि + कृ + त्वा > य) भवितुम् (भू-भव् + तुम्) समीक्ष्य (सम् + ईक्ष् + त्वा > य) ।

સમાસ : **राजवैद्यः** (वैद्यानाम् राजा राजवैद्यः अथवा राज्ञः वैद्यः राजवैद्यः, षष्ठी तत्पुरुष) **विश्वविख्यातेषु** (विश्वस्मिन् विख्यातः विश्वविख्यातः, तेषु । षष्ठी तत्पुरुष) **औषधयोगानाम्** (औषधानाम् योगः औषधयोगः, तेषाम् । षष्ठी तत्पुरुष) **औषधविज्ञानस्य** (औषधस्य विज्ञानम् औषधविज्ञानम्, तस्य । षष्ठी तत्पुरुष) **रोगरहितः** (रोगेण रहितः रोगरहितः । तृतीया तत्पुरुष)

વિશેષ

(1) શબ્દાર્થ : कनिष्कनृपतेः કનિષ્ક નામના રાજાના **ग्रन्थस्य प्रमाणम्** ગ્રંથનું પ્રમાણ, ગ્રંથનું કદ (પ્રાચીન સમયમાં ગ્રંથના કદને માપવાની એક પદ્ધતિ હતી. તે મુજબ ગ્રંથના બધા જ અક્ષરોને ગણીને તે અક્ષરોની સંખ્યાને બત્રીસથી (ક્યારેક આઠથી) ભાગતાં જે જવાબ આવે, તે જવાબની સંખ્યાને ગ્રંથનું કદ માનવામાં આવતું.) **द्वादशसहस्रश्लोकात्मकः** બાર હજાર શ્લોકનું પ્રમાણ-કદ ધરાવતો **सहस्रद्वयम्** બે હજાર **निवारकानि** નિવારણ કરનારા **विनाशकानि** વિનાશ કરનારા, મટાડનારા **उच्छिष्टम्** એઠું, વાપર્યા પછી બચેલું **स्मर्तव्याः** યાદ રાખવા યોગ્ય **हिताहारविहारसेवी** હિતકારક ભોજન અને આચરણનું સેવન કરનાર **समीक्ष्यकारी** સારી રીતે વિચારીને કામ કરનાર, સમજી વિચારીને વર્તનાર **दाता** દાન કરનાર **समः** સમતાવાળો, બધા માટે સમત્વની ભાવના રાખનાર **आप्तोपसेवी** આપ્ત માણસોની સેવા કરનાર (યથાર્થવક્તા અર્થાત્ જે છે, તેવું કહેવાનું વ્રત રાખનાર અને સાક્ષાત્કૃતધર્મા એટલે કે જેણે પોતાના જ્ઞાન અને કર્મથી ધર્મનો સાક્ષાત્કાર કર્યો છે, તેવા મહાન આત્માને આપ્ત કહે છે.) **अरोगी** રોગ વગરનો.

(2) સંધિ : अयमेवाचार्यः (अयम् एव आचार्यः) । चाधिकृत्य (च अधिकृत्य) । यदिहास्ति (यत् इह अस्ति) । यन्नेहास्ति (यत् न इह अस्ति) । उक्तेरयमर्थः (उक्तेः अयम् अर्थः) । विषयेष्वसक्तः (विषयेषु असक्तः) । भवत्यरोगी (भवति अरोगी) भवितुमर्हतीति (भवितुम् अर्हति इति) । तस्येदमुत्तरम् (तस्य इदम् उत्तरम्) । करणीय एव (करणीयः एव) । भवतीत्येषः (भवति इति एषः) ।

સ્વાધ્યાય

1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।

(1) चरकसंहितायाः प्रकरणेषु कति अध्यायाः सन्ति ?

(क) 120 (ख) 122 (ग) 100 (घ) 210

(2) हिताहारविहारसेवी नरः कीदृशो भवति ?

(क) अरोगी (ख) विद्वान् (ग) आप्तसेवी (घ) बलवान्

(3) 'ज्वरः' शब्दस्य अर्थः कः ?

(क) ઝવેરાત (ख) ताव (ग) જરાક (થોડું) (घ) જરા (ઘડપણ)

(4) 'उचितः' शब्दस्य विरुद्धार्थः कः ?

(क) निश्चिंतः (ख) अरुचिः (ग) सूचितः (घ) अनुचितः

(5) 'रोगरहितः' शब्दस्य समासप्रकारं लिखत ।

(क) षष्ठी तत्पुरुष (ख) द्वितीया तत्पुरुष (ग) तृतीया तत्पुरुष (घ) पञ्चमी तत्पुरुष

(6) 'कुत्रापि' शब्दस्य योग्यसन्धिविच्छेदं दर्शयत ।

(क) कुत्रा + अपि (ख) कुत्र + अपि

(ग) कु + तत्र + अपि (घ) कु + त्रापि

2. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।

(1) आचार्यचरकस्य कः ग्रन्थः सुप्रसिद्धः वर्तते ?

(2) चरकस्य ग्रन्थे कस्य व्याख्यानं वर्तते ?

(3) औषधस्य आवश्यकता कदा भवति ?

(4) स्वास्थ्ये कस्य प्रभावो भवति ?

3. रेखाङ्कितपदानि आधृत्य प्रश्नवाक्यं रचयत ।

(कस्य, केन, कः, कस्मै)

(1) चरकाचार्यस्य चरकसंहितानामकः सुप्रसिद्धः ग्रन्थः वर्तते ।

(2) चरकाचार्यः भारते औषधविज्ञानस्य प्रवर्तकः इति मन्यते ।

(3) मानवेन सम्यक् व्यवहारः करणीयः ।

4. वर्गसहितं अनुनासिकपदं लिखत ।

उदा. संजातः च वर्गः सञ्जातः

(1) परंतु .... (2) तदानींतनम् ....

(3) संमिल्य .... (4) अंगम् ....

5. स्वभाषायाम् अनुवादं कुरुत ।

(1) आयुर्वेदस्य प्राचीनतमेषु विश्वविख्यातेषु च ग्रन्थेषु अस्य गणना भवति ।

(2) अत्र प्रायः सहस्रद्वयम् औषधयोगानां विस्तृतं व्याख्यानमस्ति ।

(3) निखिलमपि आयुर्वेदसाहित्यम् आचार्यचरकस्य उच्छिष्टमस्ति ।

(4) यः नरः हितस्य आहारस्य विहारस्य च सेवनं करोति सः रोगरहितो भवति ।

(5) यदा रोगः शरीरे प्रविष्टो भवति तदा औषधस्य आवश्यकता भवति ।